International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2024; 1(1): 85-87
© 2024 IJMH
www.themultijournal.com

Received: 12-04-2024
Accepted: 26-04-2024
Publish : 27-04-2024

Dr. I. Rajesh
Research Scholar,
Department of Agama,
NSU-Tirupati

Correspondence:
Dr. I. Rajesh
Research Scholar,
Department of Agama,
NSU-Tirupati

श्रीपाञ्चरात्रे भारद्वाजसंहितानुसारं नित्यार्चनाविधेः निरूपणम्

Dr. I. Rajesh

अमृताध्मातमेघाभममृताहरणं विभुम्।
पाञ्चरात्रागमाचार्यं वन्दे वैकुण्ठभूपतिम्।।

अनाद्यविद्यावासनारूपेण मनुष्यजन्मप्राप्तवतां बद्धानां कर्मबन्धनादस्मात्संसारचक्रात् मुक्तिसम्पादनमेव परमलक्ष्यत्वेन लक्ष्यते। उपेयस्य श्रीमन्नारायणस्य सुसायुज्यसम्पादनमेव मोक्ष इति, तत्प्राप्तये कर्मज्ञानभक्तिरूपोपाया इति साक्षाद्भगवता श्रीकृष्णपरमात्मना गीताया-मुपदिष्टम्। त्रिष्वप्युपायेषु भगवदनुग्रहप्राप्तिरूपं कर्मैव, तत्कर्मापि समाराधनरूपक्रिया विधि -रिति बहुषु ग्रन्थेषु दृश्यते। तद्यथा -

भक्त्या भगवन्तं नारायणमर्चयेत्।
तद्विष्णोः परमं पदं गच्छतीति।। इति

एवं भगवद्गीतायां - **अनन्येनैव योगेन मां ध्यायन्त उपासते।**
तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।।[1] इति

सकलचराचरसृष्टेः प्रमाणभूतः सकलनिखिलागमवेदशास्त्रेतिहासोपनिषद्भिः प्रामाणभूतः समस्तजीव-संरक्षकः, समस्तदेवतामुनिगणैः संसेव्यमानोति भगवान् श्रीमन्नारायणः। परव्यूह- विभवान्तर्याम्यर्चावतारत्वेन समस्तविश्वकोटौ व्याप्तः। तेषु सर्वमानवश्रेयोदायको अर्चावतारः सर्वोपजीव्यानुग्रहविशेषः। श्रीमद्भागवते सप्तमे स्कन्धे पञ्चमोऽध्याये श्रवणकीर्तनादिनवविधभक्तितत्त्वानि प्रकृष्टेन वर्णितानि। भगवदनुग्रहः नवधा वयं प्रासुमः। तद्यथा -

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।।[2] इति।

नवविधभक्तिषु अर्चनाविधिरेवात्यन्तश्रेयोदायकः सरलतमश्च। अर्चनाविधिः आगमोक्त दिशा समाचरणेनावश्यं मुक्तिर्लभ्यत इत्यत्र नास्ति कश्चन संशीतिः। पुरुषोत्तमसंहितानुसारं आगमः नाम भगवतः अर्चनादिना भगवतः प्राप्तिः तत्प्रभावसम्पादनमेवेत्युक्तम्। तद्यथा -

आचारकथनाद्दिव्यगतिप्राप्तिविधानतः।
माहात्म्यतत्त्वकथनादागमश्चेति गण्यते।।[3] इति

कपिलसंहितानुसारं भगवतः धर्माधर्मनिर्णयावसरे याथातथ्योपदेशकः विषयज्ञानबोधको आगम इति ज्ञायते। तद्यथा -

आसमंतात् गमयति धर्माधर्मौ वरं पदम्।
आगमस्तेन कथितः इति वेदविदो विदुः।।[4] इति।

आगमशब्दविषये पौष्करसंहितायाम्-

कर्तव्येन वै यत्र चातुरात्म्यमुपासते।
क्रमागतैः स्वसंज्ञाभिः ब्राह्मणैरागमं तु तत्।।[5] इति

नमश्शब्दाद्युपेतः वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धनामभिः यो भगवानुपासितो भवति सः आगमः इति भणतिम्। एवञ्च भगवतः आराधनादिकं येन स्पष्टीक्रियते सः आगमः इत्युच्यते।

लोके बौद्धजैनाख्याः बहवः आगमशब्दोपेततया च शोश्रूयमाणाः वर्तन्ते। परं ते अवैदिकाः सन् परमात्मनः स्थितिम्, सम्पादनं च नैव स्पष्टीक्रियन्ते। अत एव वैदिकागमानां अनुसरणमेव गतित्वेन स्वीक्रियते भगवतः सुसायुज्येसम्पादने! एतेषु वैखानसशैवादयः अन्तर्भवन्ति।

परं भगवतः आराधनार्थं आविर्भूतेष्वागमेष्वयमन्यतमः भवति श्रीपाञ्चरात्रागमः। आगमोऽयं साक्षात् भगवतः श्रीमन्नारायणेन उपदिष्टः इति पुरुषोत्तमसंहितानुसारं ज्ञायते तद्यथा –

सार्धकोटिप्रमाणेन ब्रह्मणा केशवाच्छ्रुतम्।

रात्रिभिः पञ्चभिस्सर्वं पाञ्चरात्रागमं स्मृतम्।।[6] इति

श्रीमन्नारायणेनोपदिष्टे श्रीपाञ्चरात्रागमे भगवदाराधनममूर्त-समूर्तभेदेन द्विधा उपदिश्यते। तद्यथा **तत्राराधनं द्विविधममूर्तं सामूर्तमिति** वह्नौ विविधदेवतानुद्धिश्य समन्त्रकहविस्समर्पण-ममूर्तमिति, तत्रापि विविधदेवेभ्यः समर्पितहविः सर्वदेवान्तर्यामिणं परमपुरुषं श्रीमन्नारायण -मेव प्राप्यत इति ज्ञायते। यथा - **अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।**[7] इति

भगवदालयेषु प्रतिष्ठितेषु विग्रहेषु अर्घ्याद्युपचारैराराधनं यत्तत् सामूर्तार्चाधनमित्युच्यते। **क्रियावानेष ब्रह्मविदां वरिष्ठः क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः**[8] इत्यदिषु श्रूयमाणेन क्रियाशब्देन समूर्तयज-नस्यैव विवक्षितत्वात् समूर्तयजनरूप भगवदाराधनमेव मोक्षसाधनं भवति। अनयोः अमूर्तसमूर्तयोः समूर्ताराधनं पुनः वैदिकतान्त्रि-कमिश्रभेदेन त्रिविधं भजते।

तद्यथा - **वैदिकस्तान्त्रिको मिश्र इति मे त्रिविधो मखः।**[9] इति

इत्येतेन एषु केवलं वेदमन्त्रैः आराधनं वैदिकमिति, तन्त्रोक्त-मार्गाराधनं तान्त्रिकमिति वैदिकतान्त्रिकसमन्वयात्मकमाराधनं मिश्रमिति च बोध्यते। एतानि त्रीण्यपि प्रत्येकरूपेण विभिन्नेषु शास्त्रेषु प्रतिपादितानि। वैखानसागमः केवलवैदिकमन्त्रैः आराधनम्, शाक्तग्रन्थाः केवलतान्त्रिकमार्गेणाराधनम्, यामलादिग्रन्थाः मिश्र-रूपाराधनं च प्रत्यपादि इति साधारणतया दृश्यते। परन्तु अत्र विशेषेण भगवन्मुखोदिते श्रीपाञ्चरात्रागमशास्त्रे एतानि त्रिविधरूप आराधनानि स्थानभेदेन सूच्यन्ते। अस्मिन् शास्त्रे श्रुत्युक्ताराधनमपि अर्थात् मासाराधनमपि विशेषरूपेण बोध्यति। यथा –

वैदिकैस्तान्त्रिकैर्वापि श्रोतैर्वा द्विजसत्तम।

स्वयं व्यक्ते तु भवति मिश्रैर्वा देवमर्चयेत्।।[10] इति

श्रीपाञ्चरात्रसम्बन्धितासु श्रीमन्नारायणसंहिता इत्यादिषु श्रौतमार्गानुसारेण यज्ञरूपं समाराधनं सात्वतजयाख्यादिषु तान्त्रिक-रूपेण, ईश्वरपारमेश्वरपाद्मभारद्वाजसंहितासु उभयाधा प्रतिपा-दितम्। एतेषु प्रतिपादिताः विधयः केवलं मन्त्राणां प्रक्रियाभेदा एव कालविषये सर्वाः अपि तुल्यकक्षाः इति ज्ञातव्यम्। भारद्वाजसंहितायां भारद्वाजो मुनिः स्वशिष्येभ्यो मुनिभ्यो नैमिषारण्ये नित्यार्चन विधिः इत्थं सूचयति।

नित्यार्चनाविधिः

नित्यार्चनाविधिं वक्ष्ये शृणुष्व द्विजसत्तम।

अर्चकः प्रातरुत्थाय स्नात्वा चैव यथा विधि।।[11] इति

अर्चकः प्रातरुत्थाय शुचिः स्नात्वा ततः भगवदाराधन निमित्तं शुद्धजलं समानीय प्रसन्नेन हृदे कृत्वा उपविश्य स्वयमाचम्य प्राणायामत्रयं कृत्वा, संकल्प्य, प्रथमं विष्वक्सेनं प्रपूज्य ततः पुण्याहं वाच्य तज्जलेन गर्भमन्दिरशुकनासिकस्थूपिकामध्यरङ्गमहदास्थान-मण्डपसैद्धान्तराल- गोपुरप्राकारपचनालययागशालाद्यनेकवास्तुम-ण्डपादिसंप्रोक्ष्य गर्भगेहं प्रविश्य पुनः प्राणायामं समाचरेत्। अर्घ्यपाद्याचमनीयस्नानाशुध्दोदकपात्राणि जलेनापूर्याष्टाक्षरीन्यासं यथाशक्ति कुर्यात्। तद्यथा –

अस्य श्रीमदष्टाक्षरी महामन्त्रस्य अन्तर्यामी नारायणो ऋषिः, देवी गायत्रीच्छन्दः, परमात्मा श्रीमन्नारायणो देवता, अं बीजं, ऊं शक्तिः, मं कीलकम्, शुक्लो वर्णः, बुद्धिस्तत्त्वं, परमं व्योम इति क्षेत्रं भगवत्समाराधनार्थे विनियोगः इति संकल्पयेत्।

इत्येवं न्यासं विधाय ततः मन्त्रासनमाचरेत्। वस्तुतः मन्त्रासने -

1. योगपीठार्चनम्
2. आग्नेयादिकोणार्चनम्
3. प्रागादिदिग्देवतार्चनम्
4. कीलारूपेणार्चनम्
5. पाशरूपेणार्चनम्
6. सूत्ररूपेणार्चनम्
7. तूलिकारूपेणार्चनम्
8. आस्तरणरूपेणार्चनम्
9. मण्डलार्चनमित्यादीनि अन्तर्भवन्ति।

ततः स्नानासनं यथाशक्ति येत्। स्नानासनं नाम भगवतः अभिषेकार्थमुपयुज्यमानमित्यर्थः।

स्नानासने भगवतः अथवा सालग्रामादीनां प्रति अर्घ्यपाद्या-चमनगण्डूषणजिह्वाशोधनादिकं यथामन्त्रं निर्वाह्य पूंसूक्तादिभिः भगवन्तं स्नापयेत्। अर्चकः स्नानासने पवमानसूक्तं संपठेत्। एवं दशशान्तयोऽपि पठ्यन्ते। तदुक्तम्-

स्नानासनं ततो दध्यात्तेनैव द्विजसत्तम।

पञ्चसूक्तविधानेन दशशान्त्याभिषेचनम्।।[12] इति

अर्चकः स्नानासनानन्तरमलङ्कारासनं तत्तन्मन्त्रैः विदद्यात्। अस्मिनलङ्कारासने विशेष-वस्त्राणां समर्पणमेवं तिरुमुखमण्डले

ऊर्ध्वपुण्ड्रधारणम्, सुगन्धपरिमलचन्दनसमर्पणमेवं यज्ञोपवीत-समर्पणम्, जाजीचम्पकातिक्रान्तदिसुगन्धपुष्पमालासमर्पणम्, चन्द-नागरुकस्तूरी-धूपाद्युपचाराः विधास्यन्ते।

ततः अर्चकः यथाशक्ति भक्ष्यभोज्यलेह्यचोष्यरूपाणि चतुर्विधान्नानि निवेद्यरूपेण यथाविधि बलिं प्रदाय नीराजन-पूर्वकमन्त्रपुष्पं समर्पयेत्। तथैव सायाह्नेपि देशिकेन केवल-पचारैः श्रीमन्नारायणस्यार्चनं समापयेत्। तेन भगवान्नारायणः सुप्रीतः सुप्रसन्नो भवेदत्। तदुक्तम्-

अन्नं चतुर्विधं दद्याद्बलिदानं यथाविधि।
नीराजनं ततो दत्वा मन्त्रपुष्पं समर्पयेत् ।।
सायाह्ने विप्रशार्दूले अर्घ्यमन्त्रं प्रदद्यात्।
अन्नादीनि ततो दद्याद्यथा विभवसारतः।।
एवं यः कुरुते नित्यं तस्य विष्णुः प्रसीदति। इति

एवंरीत्या भारद्वाजसंहितायां भगवतार्चनापद्धतिः सुष्ठु प्रत्यपादि।

उपयुक्तग्रन्थसूची(Bibliography)

1.भारद्वाजसंहिता– DR. रेजेटि.वेङ्कटवेणुगोपालाचार्यः आन्ध्रपञ्च-रात्रपब्लिकेशन्स् राजमहेन्द्रवरम्

2.श्री पुरुषोत्तमसंहिता- Dr. PTG रङ्गरामानुजाचार्युलु राष्ट्रिय-संस्कृतविश्वविद्यालयम्, तिरुपतिः

3.श्रीपाञ्चरात्रागमसंहिता प्रमाणपदकोशः श्रीमान् Dr. कण्डलकुण्ट कोदण्डरमाचार्युलु जयनगरम्

पाद टिप्पणी

1. भ.गी.12.6,7
2. श्री.भा.म. 7.5.23,24
3. पु.सं.1.3
4. कपि.सं
5. पौष्कर.सं.1.15
6. पु.सं. 1 . 5
7. भ-गी . 9.24
8. मुण्डके . 3.4
9. श्री-भा .11.27.7
10. पा.र. 19.52
11. भा.सं. 1.1
12. भा.सं9.5